# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम्** - ४ गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड** - C.C-4.1.3 समयः - ३:०० तः ६:००

दिनाङ्कः - ८.१२.२०१६ सन्दर्भग्रन्थः - व्युत्पत्तिवादः, काशिकावृत्तिश्च

---

प्रथमान्वितिः (युनिट - १)

प्रश्नः १ निम्नलिखितयोरेकस्य अंशस्य सप्रसङ्गं व्याख्या कार्या- (४)

क. वेदाः प्रमाणम् इत्यत्र च विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वेऽन्वेति। शाब्दप्रमाकरणत्वं च शब्दत्वावच्छिन्नं यावच्छब्दनिष्ठमेकमेवेति नायोग्यता।

ख. एवं जात्याकृतिव्यक्तयः पदार्थः इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्यैकवचनान्ततोपपत्तिः।

प्रश्नः २ अभेदबोधे किं कारणमिति सोदाहरणं गुणदोषपुरःसरंयथाग्रन्थं विवेचनीयम् (१२)

**अथवा**

व्रीहित्वजातौ व्रीहिपदोत्तरसुबर्थैकत्वान्वयोपगमविषये कीदृशी शङ्का कीदृशञ्च समाधानमिति प्रतिपाद्य 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन इति नियमं परिष्कुरुत।

प्रश्नः ३ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरंलेख्यम्- (४)

क. व्युत्पत्तिवादः इत्यस्य का व्युत्पत्तिः?

ख. एकपदार्थे अपरपदार्थस्य संसर्गः शाब्दबोधविषये कथं भासते?

ग. संसर्गः कतिविधः?

घ. आधाराधेय-प्रतियोग्यनुयोगि-विषयविषयिभावादयः सम्बन्धा भेदविषयका अभेदविषयका वा?

ङ. 'वेदाः प्रमाणम्' इत्यत्र भेदाऽभेदयोर्मध्ये कीदृशो बोधो भवति?

च. 'शतं ब्राह्मणाः' इति वाक्ये 'शतम्' इत्यत्र एकवचनस्य साधुत्वसम्पादने को नियमो हेतु?

द्वितीयान्वितिः (युनिट - २)

प्रश्नः ४ निम्नलिखितयोरेकस्य अंशस्य सप्रसङ्गं व्याख्या कार्य- (४)

क. प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे तत्र ल्युडादेरधिकरणपरत्वेऽपि तथाविधान्वयबोधापत्तेः। कस्यचित् प्रतिबन्धकतां कल्पयित्वा तद्वारणे च गौरवात्।

ख. अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः। घटो घटः दण्डवान् दण्डवान् पाकं पचति इत्यादौ घटत्वदण्डवत्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावच्छिन्नस्य तथाविधान्वय बोधानुदयात्।

प्रश्नः ५ क्रियाविशेषणानाम् अभेदान्वयबोधविचारः यथाग्रन्थं सविस्तरं प्रतिपादनीयः (१२)

**अथवा**

'घटो घटः' इत्यत्र शाब्दबोधापत्तिवारणाय व्युत्पत्तिवादकर्त्रा ये ये उपायाः प्रदर्शितास्तान् सर्वानुपायानुपस्थापयत।

प्रश्नः ६ निम्नलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां लघूत्तरं लेख्यम्- (४)

क. सुबन्ततिङन्तयोर्मध्ये अभेदान्वयबोधो भवति न वा?

ख. क्रियाविशेषणे किं कारकं भवति?

ग. क्रियाविशेषणवाचकपदं कस्मिन् लिङ्गे प्रयुज्यते?

घ. व्युत्पत्तिवादग्रन्थानुसारं 'पाकः' इत्यत्र 'घञ्'-प्रत्ययः किमर्थं क्रियते?

ङ. 'स्तोकः पाकः' अत्र स्थले स्तोकस्य अन्वयः 'पाकः' इत्यत्र प्रकृत्यर्थे प्रत्ययार्थे वा भवति?

ङ. 'स्तोकं स्थीयते' इत्यत्र 'स्था' धातोः कस्मिन् अर्थे लट्-लकारो भवति?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ७ निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. वृद्धिरादैच्।

ख. ईदूदेद् द्विवचनं प्रगृह्यम्।

प्रश्नः ८ "तुल्यास्यप्रयत्नं सवर्णम्" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (८)

**अथवा**

"सर्वादीनि सर्वनामानि" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं लेख्यम्- (३)

क. "न धातुलोप आर्धधातुके" सूत्रेण कयोर्निषेधो भवति?

ख. "दीधीवेवीटाम्" सूत्रेण कयोर्निषेधो भवति?

ग. "नाऽज्झलौ" सूत्रेण कस्याः संज्ञाया निषेधो भवति?

घ. "निपात एकाजनाङ्" सूत्रेण का संज्ञा क्रियते?

ङ. "निपात एकाजनाङ्" सूत्रेऽस्मिन् 'एकाच्' इत्यत्र कः समासो वर्त्तते?

चतुर्थान्वितिः (युनिट - ४)

प्रश्नः १० निम्नलिखितयोरेकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या- (४)

क. अलोऽन्त्यस्य।

ख. तस्मिन्निति निर्दिष्टे पूर्वस्य।

प्रश्नः ११ "स्थानिवदादेशोऽनल्विधौ" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या। (८)

**अथवा**

"न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" सूत्रस्य ससन्दर्भं सोदाहरणञ्च व्याख्या कार्या।

प्रश्नः १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं लेख्यम्- (३)

क. अनेकाल् आदेशः कस्य स्थाने भवति?

ख. ङिद् आदेशः कस्य स्थाने भवति?

ग. परस्य स्थाने क्रियमाणं कार्यं कस्य स्थाने भवति?

घ. "द्विर्वचनेऽचि" सूत्रेण कः स्थानिवद् भवति?

ङ. षड्विधेषु सूत्रेषु "प्रत्ययलोपे प्रत्ययलक्षणम्" कीदृशं सूत्रमस्ति?

***